**केन्द्रीय विद्यालय विजयपुर**
**आदर्श प्रश्न पत्र (२०१९-२०)**

**विषय - संस्कृतं** **कक्षा – नवम**

**पूर्णांक: - ८०** **समय - त्रय: होरा**

**सूचना :**

- अक्षराणि शुद्धानि भवितव्यानि ।
- समुचितानि उत्तराणि लेखितव्यानि ।

*प्रश्न पत्रे चत्वारः खंडाः सन्ति ।
खण्ड–(क) अपठित अवबोधनम्
खण्ड–(ख) रचनात्मक कार्यम्
खण्ड–(ग) अनुप्रयुक्त व्याकरण
खण्ड–(घ) पठित अवबोधनम्
*सर्वे प्रश्नाः अनीवार्यः सन्ति
*प्रश्नसंख्यां अवश्यं लेखनीयम्

## खण्ड–क अपठित अवबोधनम्

**प्र.१] अधोलिखितं अनुच्छेदं पठित्वा प्रश्नानां उत्तराणि लिखत ।**

भारतीयविज्ञानस्य सुदीर्घ–परम्परायां आर्यभट्टस्य नाम अग्रगण्यः अस्ति । अनेन विरचितं प्रसिद्धं पुस्तकं 'आर्यभट्टयम्' अस्ति । तस्मिन् एव ग्रन्थे लिखितं यत् आर्यभट्टस्य जन्म 476 तमे वर्षे अभवत् । अस्य कर्मभूमिः पाटलिपुत्र आसीत् । आर्यभट्टः महान् गणितज्ञः ज्योतिर्विद चासीत् । ;सूर्यः अचलः, पृथवी चला या स्वकीये अक्षे घूर्णति' इति सिद्धान्तस्य स्थापनां सर्वप्रथमं आर्यभट्टः एव अकरोत् । तस्य योगदानं गणितज्योतिषा सम्बद्धं वर्तते । गणितपद्धत्या आंकलनं आधृत्य सर्वप्रथमः तेन सूर्यग्रहणस्य चन्द्रग्रहणस्य च वैज्ञानिकव्याख्योः प्रस्तुता । तदा तस्य सिद्धान्ताः समाजे उपेक्षिताः तेन सूर्यग्रहणस्य, चन्द्रग्रहणस्य च वैज्ञानिकव्याख्योः प्रस्तुता ।

**१) एकपदेन उत्तरत ।** **[2x1=2]**

i) ज्ञानविज्ञानस्य सुदीर्घा–परम्परायां कस्य नाम अग्रगण्यः अस्ति ?

ii) आर्यभट्टस्य जन्मं कदा अभवत् ?

**२) पूर्णवाक्येन उत्तरत ।** **[1x1=1]**

i) आर्यभट्टः कस्य विषये संशोधितः ?

**३) अधोलिखितानां प्रश्नानां उत्तराणि लिखत ।** **[2x$\frac{1}{2}$=2]**

i) 'आर्यभट्टः महान् गणितज्ञः ज्योतिर्विदः चासीत् ।' अत्र 'आसीत्' इति क्रियापदस्य कर्तृपदं किं अस्ति ?

अ) महान्, आ) आर्यभट्टः, इ) गणितज्ञः

ii) 'तस्य योगदानं गणितज्योतिषा सम्बद्धं वर्तते । अत्र 'तस्य' इति सर्वनामपदं कस्मै प्रयुक्तम् ?

अ) राजाय, आ) छात्राय, इ) आर्यभट्टाय

iii) 'आधुनिकैः विज्ञानिकैः तस्मिन् समादरः प्रकटितः । 'अत्र 'आधुनिकैः' इति शब्दे किं विभक्तिः प्रयुक्तम् ?

अ) प्रथमा एकवचन, आ) तृतीया बहुवचन, इ) सप्तमी बहुवचन

iv) 'चल' इति पदस्य किं विपरितार्थकं पदं अत्र प्रयुक्तम् ?

अ) अचलः, आ) चासीत्, इ) चला

## खण्ड 'ख' रचनात्मकं कार्यम्

**प्र.२] भवतः नाम सार्थकः । भवतः विद्यालये संस्कृत नाटकस्य मञ्चनम् अभवत् । तदर्थं मित्र हर्षं प्रति लिखितं पत्रं मञ्जूषायाः पदानां सहायतया पूरयत ।** **[10x$\frac{1}{2}$=5]**

नवयुगविद्यालयः-------

दिनाङ्कः-२५-०९-२०१८

प्रियमित्र---------

---------- । अत्र अवगतं कुशलम् । आशा अस्ति भवान् अपि कुशली । यथा त्वं जानासि गत सप्ताह मम विद्यालये सांस्कृतिक-उत्सवः सम्पन्नः । अस्मिन् उत्सवे संस्कृतपरिषदः --------- पाठ्यपुस्तकस्य 'कवयामि वयामि यामि' इति नाटकस्य --------- कृतम् । तस्मिन् नाटके मया 'भोजस्य' अभिनयः कृतः । कुविन्दस्य अभिनयं तु वैभवेन कृतम् । तस्य मुखात् श्लोकगायनं ------ सर्वे उपस्थिताः दर्शकाः भावविभोराः जाताः करतलध्वनिनाभिः च तस्य उत्साहवर्धनम् --------- । कार्यक्रमस्य अन्तेअपि मुख्यातिथिमहोदयेन संस्कृतनाटकस्य भूरि-भूरि ------- कृता ।

तव विद्यालयेद् संस्कृतोत्सवः कदा भविष्यति अवश्यं सूचय । मातृपितृचरणेषु -------- प्रणामाः ।

भवतः मित्रम् ।

---------।

| श्रुत्वा, मम, सार्थकः, हर्षः!, प्रशंसा, अकुर्वन्, छात्रैः, सस्नेहम्, नमः, मञ्चनम्, दिल्लीतः । |
|---|

**प्र.३] मञ्जूषायां प्रदत्तशब्दानां सहायतया चित्रं दृष्ट्वा पञ्चवाक्यानि संस्कृते लिखत ।** **[5x1=5]**




**प्र.४]संसकत भाषायां लिखितानां पञ्चसरलवाक्यानां हिन्दी आङ्गलभाषायां वा अनुवादं कुरुत ।** **[5x1=5]**

१) एषः अग्निः किमर्थं ज्वलति ?

२) अनेके नराः उद्याने व्यायामं कुर्वन्ति ।

३) अद्य मम संस्कृत परीक्षा अस्ति ।

४) मम नाम -------- अस्ति ।

५) संस्कृत भाषा सरला सुलभा च अस्ति ।

## खण्ड 'ग' अनुप्रयुक्त-व्याकरणम्

**प्र.५] अधोलिखित प्रश्नानां उत्तराणि लिखत ।** **[4x1=4]**

1) 'ओ' वर्णस्य उच्चारणस्थानं किमस्ति ?
2) 'ण' वर्णस्य उच्चारणस्थानं किम् ?
3) उचितं वर्णसंयोजने रिक्तस्थानं पूर्तिं कुरुत ।
4) कृत्वा-क्+--त्+व्_आ

5) उचितं वर्णसंयोजनम् चिनुत ।

क्+अ+थ्+अ+य्+इ+त्+उ+म्=

**प्र.६]अधोलिखित वाक्येषु स्थूलपदानां समुचितं सन्धि विच्छेदं वा लिखत ।** **[4x1=4]**

१) **नास्ति** विद्या समं चक्षुः ।

२) एकम् **अनु+छेदं** लिखत ।

३) मूर्खेण पुत्रेण **कोऽर्थः** ?

४) **चन्द्र+उदयः** निशायां भवति ।

**प्र.७] अधोलिखित वाक्येषु कोष्ठक प्रदत्त शब्दस्य उचित रुपेण रिक्तस्थानानि पूरयित्वा पुनः लिखत ।** **[6x1=6]**

१) तानि मधुराणि------ सान्ति (फल)

२) -----उद्याने धावति । (बालकः)

३) ------ बालिका गृहं गच्छति । (एक)

४) ----- वेदाः सन्ति । (चतुर्)

५) बालकाः ------ तरन्ति । (नदी)

६) ------ बालौ गछचतः । (द्वि)

**प्र.८] अधोलिखित वाक्येषु उचित धातुरुपेण वाक्यपूर्तिं कृत्वा पुनः लिखत ।** **[3x1=3]**

१) भगतसिंह देशभक्तः ------ । (अस्–लङ्)

२) त्वम् अतिथीम् -----। (सेव्–लट्)

३) भोजराजः महान् दानवीरः ----। (अस्–लङ्)

**प्र.९] अधोलिखित वाक्येषु उचित विभक्ति प्रयोगेण कृत्वा पुनः लिखत ।** **[4x1=4]**

१) ----- परितः वृक्षाः सन्ति । (ग्राम)

२) ----- धिक् । (दुर्जन)

३) सः ----- काणः अस्ति । (नेत्र)

४) रमा ------ विभेति । (पाप)

**प्र.१०] अधोलिखित वाक्येषुप्रत्यं संयोज्य, वियोज्य वा लिखत ।** **[3x1=3]**

१) वयं भोजनालयात् किञ्चिद् **खाद्+क्त्वा** गृहं प्रति गच्छामः ।

२) मातरं **प्र+ल्यप्** सः विद्यालयं आगच्छति ।

३) छात्राः **भ्रमितुम्** पर्वतीयं प्रदेशं गच्छति ।

**प्र.११] निम्नलिखित पदेषु प्रयुक्तान् उपसर्गान् लिखत ।** **[$4x\frac{1}{2}=2$]**

१) अवकाशः

२) निष्कंटकः

३) अधिग्रहणम्

४) दुर्योधनः

**खण्ड 'घ' पठित–अवबोधनम्**

**प्र.१२] अधोलिखित गद्यांशं पठित्वा प्रदत्त प्रश्नानां उत्तराणि लिखत ।**

अस्ति हिमवान् नाम सर्वरत्नभूमिर्नगेन्द्रः । तस्य सानोरुपरि विभाति कञ्चनपुरं नाम नगरम् । तत्र जीमुतकेतुरिति श्रीमान् विद्याधरपतिः वसति स्म । तस्य गृहोद्याने कल्पतरुः स्थितः । स राजा जीमूतकेतुः तं कल्पतरुं आराध्य तत्प्रसादात् च बोधिसत्वांशसम्भवं जीमूतवाहनं नाम पुत्रं प्राप्नोत् । स मान् दानवीरः सर्वभूतानुकम्पी च अभवत् । तस्य गुणैः प्रसन्नः स्वसचिवैश्च प्रेरितः राजा कालेन सम्प्राप्तयौवनं तं यौवराज्येऽभिषिक्तान् । यौराज्ये स्थितः स जीमूतवाहनः कदाचित् हितैषिभिः पितृमन्त्रिभिः उक्तः "युवराज! योऽयं सर्वकामदः कल्पतरुः तवोद्याने तिष्ठति स तव सदा पूज्यः । अस्मिन् अनुकूले स्थिते शक्रोऽपि नास्मान् बाधितं शक्नुयात्" इति ।

१) **एकपदेन उत्तरत ।** **[2x1=2]**

क) सर्वरत्नभूमिर्नगेन्द्रः कः अस्ति ?

ख) जीमूतवानस्य पितुः नाम किम् ?

२) **पूर्णवाक्येन उत्तरत ।** **[2x1=2]**

क) विद्याधरपतिः कुत्र वसति स्म ?

ख) जीमूतकेतोर्नाम श्रीमान् विद्याधर पतिः कुत्र/कस्मिन् नगरे वा वसति स्म ?

३) **लघुउत्तरात्मकाः प्रश्नानां उत्तरत ।** **[$4x\frac{1}{2}=2$]**

क) कल्पतरोः प्रसादात् जीमूतकेतुः कं प्राप्नोत् ?

ख) महान् दानवीरः सर्वभूतानुकम्पी च कः अभवत् ?

ग) तस्य गुणैः प्रसन्नः स्वसचिवैश्च प्रेरितः कः कालेन सम्प्राप्त यौवनं तं यौवराज्येऽभिषिक्तवान् ।

घ) सर्वकामदः कः वर्तते ?

**प्र.१३] अधोलिखितं पद्यांशं पठित्वा प्रश्नानां उत्तराणि लिखत ।**

आरम्भगुर्वी क्षयिणी क्रमेण क्रमेण
लघ्वीपुरा वृद्धिमती च पश्चात् ।
दिनस्य पूर्वार्द्धपरार्द्धभिन्ना
आयेव मैत्री खलसज्जनानाम् ।

१) **एकपदेन उत्तरत ।** **[2x1=2]**

क) खल सज्जनानाम् मैत्री कीदृऋशी भवति ?

ख) दिनस्य परार्द्धे छाया कीदृशी भवति ?

२) **पूर्णवाक्येन उत्तरत ।** **[2x1=2]**

क) खलानां मैत्री कीदृशी भवति ?

३) **लघुउत्तरात्मकाः प्रश्नानां उत्तराणि लिखत ।** **[$4x\frac{1}{2}=2$]**

क) 'छायेव' पदस्य कः सन्धिच्छेदः वर्तते ?

ख) 'पश्चात्' इति शब्दस्य विपरीतार्थकः शब्दः वर्तते ?

ग) 'आरम्भः' अस्मिन् पदे कः उपसर्गः वर्तते ?

घ) 'दुर्जनानाम्' इत्यस्य पदस्य पर्यायः वर्तते ?

**प्र.१४] अधोलिखि नाट्यांशं पठित्वा प्रदत्त प्रश्नानां उत्तराणि लिखत ।**

विमला– (सकष्टं सोमप्रभामुपसृत्य)– पुत्रि ! त्वम्..... कथं त्वमिह ......

सोमप्रभा– अम्ब ! मम उपानहौ त्रुटितौ, पुस्तकमञ्जूषा च त्रुटितेति अध्यापिका मां कक्षाया निष्कासितवती । त्वया उक्तमासीत् द्रु विद्यालयाद् गृहमेव अविलम्बमागन्तव्यम् । अतोऽहं गृहमागता । (रोदिति)

विमला– मा रोदीः पुत्रि! सर्वमुपपन्नं भविष्यति ।

सोमप्रभा– अत्रागत्य मया दृष्टं यत् पितामः पितामही च त्वां मारयतः । अतोऽहं धावं स्थानकं गता । पुरुष–निरीक्षकाय मया निवेदितम् ।

विमला– (सवाष्पं सगद्गदं कण्ठमालिङ्ग्य सोमप्रभाम् ) त्व्या अहं त्राता । महतः संकटात् त्वं मामुद्धृतवती । प्रियं कृतं त्व्या मे ।

१) **एकपदेन उत्तरत ।** **[2x1=2]**

क) विमला कां आलिङ्गयति ?

ख) का स्थानकं गता ?

२) **पूर्णवाक्येन उत्तरत ।** **[1x2=2]**

क)विद्यालयात् गृहं आगत्य सोमप्रभा किं अपश्यत् ?

३) **यथानिर्देशं शुद्धं उत्तरं चित्वा लिखत ।** **[1x$\frac{1}{2}$=1]**

क) 'उपानहौ' इति पदस्य समानार्थकं पदं किम् ?

अ) त्रुटिते, आ) मञ्जूषा, इ) त्रुटितौ, ई) पदत्राणे

ख) 'त्वया अहम् त्राता।' अत्र 'त्वया' सर्वनामपदं कस्यै प्रयुक्तम् ?

अ) विमलायै, आ) विमलाय, इ) सोमप्रभायै, ई) सोमप्रभा

**प्र.१५] अधोलिखित वाक्येषु स्थूलपदानि आधृत्य प्रश्ननिर्माणं कुरुत ।** **[5x1=5]**

१) तव पणकेषु **निष्ठीवनं** करोमि ।

२) त्वं माम **नेत्रे** दर्शयसि ।

३) तथापि इयम् **माम** अधिक्षिपति ।

४) **सोमप्रभा** प्रविश्य एतत् पश्यति ।

५) **स्वसुरौ** तामपश्यन्तौ विमलां कर्षतः ।

**प्र.१६] अधोलिखित श्लोकयोः अन्वयं मञ्जूषात् समुचितं पदं चित्वा पूरयत ।** **[8x$\frac{1}{2}$=4]**

१) निनादाय नवीनामये वाणी! वीणाम् ।
लतानां नितान्तं सुमं शान्तिशीलम्
चलेदुच्छलेत्कान्तसलिलं सलीलम् ।
तवाकर्ण्य वीणामदीनां नदीनाम् ॥

अन्वयः-तव अदीनां १) ----- आकर्ण्य लतानां २)----- शान्तिशीलं सुमं चलेत् ३) ------ कान्त सलिलं सलीलं उच्छलेत् । अये वाणि! नवीनां ४) ---------- निनादाय ।

२) निनादाय नवीनामये वाणी! वीणाम् ।
वहति मन्दमन्दं सनीरे समीरे
कालिन्दात्मजायास्सवानीरतीरे
नतां पङ्क्तिमवलोक्य मधुमाधवीनाम् ॥

अन्वयः- कालिन्दात्मजायाः सवानीतीरे १)----- समीरे मन्दमन्दं वहति (सति) मधुमाधवीनां २) ------- पङ्क्तिं ३) ------ अये वाणी! नवीनां वीणां ४)-------

| |
|---|
| वीणा, नदीनाम्, नितान्तम्, वीणाम् निनादाय, अवलोक्य, नताम्, सनीरे । |

**प्र.१७] अधोलिखित वाक्याणां कथाक्रमानुसारेण लिखत ।** **[8x$\frac{1}{2}$=4]**

१) स्वर्णकाकः तत्कृते ताम्रमयं सोपानमेव प्रायच्छत् ।

२) नैतादृक् स्वादु भोजनमद्यावधि बालिका खादितवती ।

३) अहं तुभ्यं दण्डुलमूल्यं दास्यामि ।

४) लुब्धया बालिकया लोभस्य फलं प्राप्तम् ।

५) लघुतां मञ्जूषां प्रगृह्य बालिका गृहं गता ।

६) तस्यां महार्हाणि हीरकाणि विलोक्या सा प्रहर्षिता धनिका च सञ्जाता ।

७) लोभाविष्टा सा बृहत्तमां मञ्जूषां गृहीतवती, तस्यां च सर्प विलोकितः ।

८) तण्डुलान् खादन्तं हसन्तश्च विलोक्य बालिका रोदितुमारब्धा ।

**प्र.१८] अधोलिखित पदेषु पर्याय पदेन सह मेलनं कुरुत ।** **[4x1=4]**

| | | |
|---|---|---|
| १) मूढः | – | वैदुष्यम् |
| २) आञ्जनेयम् | – | वरम् |
| ३) पाण्डित्यम्– | | हनुमन्तम् |
| ४) श्रेष्ठम् | – | मूर्खः |